दशमः पाठः १०

# अमृतबिन्दवः

## ( समयज्ञानम् )

( अत्र महापुरुषाणाम् अनुभववचनानि सन्ति। एतानि चिन्तनीयानि मननीयानि जीवने पालनीयानि च सन्ति। )

**राष्ट्रं मम पिता माता प्राणाः स्वामी धनं सुखम्।**
**बन्धुराप्तः सखा भ्राता सर्वस्वं मे स्वराष्ट्रकम्।।१।।**

**भावार्थः** - मम पिता, माता, प्राणाः, स्वामी, धनं, सुखं, बन्धुः, मित्रं, भ्राता सर्वं मम राष्ट्राय एव अस्ति। अहं राष्ट्राद् अधिकं किमपि न गणयामि।

**सत्यं ब्रूयात् प्रियं ब्रूयात्, न ब्रूयात् सत्यमप्रियम्।**
**प्रियं च नानृतं ब्रूयात्, एषः धर्मः सनातनः।।२।।**

**भावार्थः** - वयं सर्वदा सत्यं प्रियं च वदाम, सत्यं किन्तु अप्रियं न वदाम । प्रियं किन्तु असत्यम् अपि न वदाम । अयमेव अस्माकं प्राचीनधर्मः ।

**अयं निजः परोवेति गणना लघुचेतसाम्।**
**उदारचरितानान्तु वसुधैव कुटुम्बकम्।।३।।**

**भावार्थः** - एतद् मम एतत् तव इति शुद्रभावना। विचारवन्तः जनाः तु समस्तपृथिवीम् एव स्वकुटुम्बं चिन्तयन्ति।

**श्रोत्रं श्रुतेनैव न कुण्डलेन, दानेन पाणिर्न तु कङ्कणेन।**
**विभाति कायः करुणापराणां परोपकारेण न चन्दनेन।।४।।**

**भावार्थः** - कर्णस्य शोभा वेदश्रवणेन भवति कुण्डलेन न। हस्तस्य शोभा दानेन भवति कङ्कणेन न, करुणापराणां शरीरस्य शोभा परोपकारेण भवति चन्दनेन न।

**यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेद्।।**
**एवं पुरुषकारेण विना दैवं न सिद्ध्यति।।५।।**

**भावार्थः** - एकेन चक्रेण रथस्य गतिः न भवति तत्र चक्रद्वयम् आवश्यकम्। तथैव कार्यसिद्धये पुरुषार्थः भाग्यम् च द्वयमपि आवश्यकं केवलं भाग्यं न पर्याप्तं न च पुरूषार्थः।

**विद्या विवादाय धनं मदाय, शक्तिः परेषां परिपीडनाय।**
**खलस्यसाधोर्विपरीतमेतत्, ज्ञानाय दानाय च रक्षणाय।। ६ ।।**

**भावार्थः** – दुष्टः विद्यायाः प्रयोगं विवादाय, धनस्य प्रयोगम् अहङ्काराय, शक्तेः प्रयोगं च अन्यपीडनाय करोति किन्तु सज्जनः तु विद्यायाः प्रयोगं ज्ञानाय, धनस्य दानाय, शक्तेश्च रक्षणाय करोति ।

**परोपकाराय फलन्ति वृक्षाः, परोपकाराय वहन्ति नद्यः।**
**परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम्।। ७ ।।**



**भावार्थः** – वृक्षाः फलानि अन्येभ्यः एव यच्छन्ति, नद्यः स्वजलं, गावः च स्वदुग्धम् अन्येभ्यः एव ददति, स्वयम् उपयोगं न कुर्वन्ति। एतेषाम् एषा परोपकारपरम्परा।

**रूपयौवनसम्पन्नाः विशालकुलसम्भवाः।**
**विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः।। ८।।**

**भावार्थः** – जनाः रूपवन्तः सन्ति, युवावस्थावन्तः सन्ति, प्रसिद्धकुले च उत्पन्नाः अपि सन्ति यदि ते विद्याहीनाः सन्ति तर्हि ते शोभिताः न भवन्ति। यथा किंशुकाः गन्धरहिताः भवन्ति अर्थात् गुणरहिताः भवन्ति अतः तान् न कोऽपि इच्छति।

**शैले शैले न माणिक्यं मौक्तिकं न गजे गजे।।**
**साधवो नैव सर्वत्र चन्दनं न वने वने।। ९ ।।**

**भावार्थः** – प्रत्येकस्मिन् पर्वते माणिक्यम् इत्याख्यं रत्नं न भवति। प्रत्येकस्मिन् गजे मौक्तिकम् इत्याख्यं रत्नं न मिलति। प्रत्येकं वने चन्दनं न मिलति। तथैव सज्जनपुरुषाः सर्वत्र न मिलन्ति।

**धनधान्यप्रयोगेषु विद्यायाः सङ्ग्रहे तथा।**
**आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेद्।। १०।।**

**भावार्थः** – धनस्य अन्नस्य विद्यायाः च सङ्ग्रहे, भोजने परस्परं व्यवहारे च लज्जा न करणीया। यः एतेषु लज्जां करोति सः दुःखी भवति।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| बन्धुः | भ्राता | भाई |
| ब्रूयात् | वदेत् | बोलना चाहिए |
| अनृतम् | मिथ्या | झूठ |
| निजः | स्वस्य | अपना |
| परः | अन्यः | पराया |
| लघुचेतसाम् | क्षुद्रचिन्तनशील-जनानाम् | छोटा चिन्तन करने वालों का |
| श्रोत्रम् | कर्णः | कान |
| पाणिः | हस्तः | हाथ |
| कङ्कणेन | हस्ताभूषणेन | कंगन से |
| विभाति | शोभते | सुशोभित होता है। |
| पुरुषकारेण | पुरुषार्थेन | परिश्रम से |
| खलस्य | दुष्टस्य | दुष्ट का |
| प्रजायते | उत्पन्नं भवति | उत्पन्न होता है। |
| शैले | पर्वते | पर्वत पर |
| लज्जा | सङ्कोचः | संकोच |

## अभ्यासः

१. निम्नलिखितशब्दानां शुद्धोच्चारणं कुरुत -

बन्धुराप्तः, स्वराष्ट्रकम्, ब्रूयात्, नानृतम्, उदारचरितानान्तु, कुटुम्बकम्, श्रुतेनैव, कङ्कणेन, ह्येकेन, विपरीतमेतत्, परोपकारार्थमिदम्, त्यक्तलज्जः।

**२. पाठे प्रदत्तपद्यानां सस्वरं वाचनं कुरुत -**

**३. प्रश्नानाम् उत्तराणि एकपदेन लिखत -**

(क) परोपकारेण केषां कायः विभाति ?

(ख) अयं निजः परो वेति केषां गणना अस्ति ?

(ग) केषां वसुधैव कुटुम्बकम् ?

(घ) किं न ब्रूयात् ?

(ङ) केन विना दैवं न सिद्ध्यति ?

**४. प्रश्नानाम् उत्तराणि एकवाक्येन लिखत -**

(क) हस्तस्य शोभा केन भवति ?

(ख) करुणापराणां कायः केन विभाति ?

(ग) माणिक्यं मौक्तिकं च कुत्र कुत्र न वर्तेते ?

(घ) कुत्र लज्जा न करणीया ?

(ङ) खलस्य किं किं अन्यस्य पीडनाय भवति ?

**५. श्लोकांशैः रिक्तस्थानानि पूरयत -**

(क) प्राणाः स्वामी ......................सुखम्।

(ख) ................................नानृतं ब्रूयात्।

(ग) अयं ...............................परोवेति।

(घ) साधवो नैव........................वने वने।

(ङ) परोपकाराय........................शरीरम्।

**६. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत -**

(क) न ब्रूयात् सत्यमप्रियम्।

(ख) पुरुषकारेण विना दैवं न सिद्ध्यति।

(ग) साधवो न हि सर्वत्र।

(घ) एषः धर्मः सनातनः।

(ङ) परोपकाराय दुहन्ति गावः।

७. **निम्नलिखितपदानां सन्धिविच्छेदं कुरुत -**

(क) बन्धुराप्तः --------- + --------

(ख) नानृतम् --------- + --------

(ग) वसुधैव --------- + --------

(घ) जलमन्नम् --------- + --------

(ङ) नैव --------- + --------

८. **संस्कृतेन समयं लिखत -**

**यथा -** ६:०० = षड्वादनम्।

(१) ९:३० = ---------------- ।

(२) ८:०० = ---------------- ।

(३) १०:४५ = ---------------- ।

(४) ११:३० = ---------------- ।

(५) १२:१५ = ---------------- ।

९. **कोष्ठकात् समयं चित्वा अक्षरैः लिखित्वा रिक्तस्थानं पूरयत -**

(क) बालकः .................. वादने विद्यालयं गच्छति। ( ८:०० )

(ख) माता ............................... अल्पाहारं पचति। ( ७:०० )

(ग) नरेन्द्रः सायं .................दूरदर्शने वार्तां शृणोति। ( ९:३० )

(घ) रेलयानं प्रातः ..................... जोधपुरं गच्छति। ( ६:४५ )

(ङ) श्यामः ..............................अध्ययनं करोति। ( १०.१५ )

## योग्यता-विस्तारः

१. प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात्तदेव वक्तव्यं वचने का दरिद्रता।। १ ।।
वरं प्राणपरित्यागो अपमानेन जीवनात्।
प्राणत्यागे क्षणं दुःखं मानभङ्गे दिने दिने।। २ ।।
अधमाः धनमिच्छन्ति धनमानञ्च मध्यमाः।
उत्तमाः मानमिच्छन्ति मानो हि महतां धनम्।। ३ ।।

२. **संस्कृतेन समय जानीमः –**


पञ्चवादनम्
५:००


सपादपञ्चवादनम्
५:१५


सार्धत्रिवादनम्
३:३०


पादोननववादनम्
८:४५


पञ्चाधिकपञ्चवादनम्
५:०५


दशाधिकषड्वादनम्
६:१०


पञ्चोनद्विवादनम्
१:५५


दशोनत्रिवादनम्
२:५०

३. **समयज्ञानस्य भाषाक्रीडा जानीमः –**

शिक्षकः छात्रद्वयस्य मध्ये क्रीडां कारयेत्। एकःछात्रः प्रश्नं पृच्छेत्– त्वं कदा उत्तिष्ठसि ?

द्वितीयः छात्रः उत्तरं वदेत् अहं ..................वादने उत्तिष्ठामि।

एवं बहून् गणान् रचयित्वा छात्राणां मध्ये परस्परम् अभ्यासं कारयेत्।

**अध्यापकाय निर्देशः**

१. अध्यापकः उपरोक्तानुसारेण समयज्ञानं कारयेत् ।